# Gangashtakam

# गङ्गाष्टकम्

## Document Information

Text title : gangAShTakam

File name : gangAShTakam.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Author : Anantanandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# गङ्गाष्टकम्

न शक्तास्त्वां स्तोतुं विधिहरिहरा जह्नतनये
    गुणोत्कर्षाख्यानं त्वयि न घटते निर्गुणपदे ।
अतस्ते संस्तुत्यै कृतमतिरहं देवि सुधियां
    विनिन्द्यो यद्वेदाश्चकितमभिगायन्ति भवतीम् ॥ १॥

तथाऽपि त्वां पापः पतितजनतोद्धारनिपुणे
    प्रवृत्तोऽहं स्तोतुं प्रकृतिचलया बालकधिया ।
अतो दृष्टोत्साहे भवति भवभारैकदहने
    मयि स्तुत्ये गङ्गे कुरु परकृपां पर्वतसुते ॥ २॥

न संसारे तावत्कलुषमिह यावत्तव पयो
    दहत्यार्यै सद्यो दहन इव शुष्कं तृणचयम् ।
पलायन्ते दृष्ट्वा तव परिचरानन्तकजना
    यथा वन्या वाऽन्ये वनपतिभयाद् वामनमृगाः ॥ ३॥

जना ये ते मातर्निधनसमये तोयकणिकां
    मुखे कृत्वा प्राणाञ्जहति सुरसङ्घैरनुवृता ।
विमाने क्रीडन्तोऽमरपतिपदं यान्ति नियतं
    कथा तेषां का वा जननि तव तीरे निवसताम् ॥ ४॥

शिवः सर्वाराध्यो जननि विषतापोपशमनं
    चरीकर्तुं गङ्गे कलिकलुषभङ्गे पशुपतिः ।
जटायां सन्धत्त ललितलहरीं त्वां सुरनदी
    त्वदन्या का वन्द्या परममहिता वा त्रिभुवने ॥ ५॥

जनस्तावन्मातर्दुरितभयतो बिभ्यति सृतौ
    न यावत्त्वत्तीरं नयनपथमायाति विमलम् ।
यदाप्तं त्वत्तीरं तदनु दुरितानां न गणना
    ततो गङ्गे! वन्द्या मुनिसमुदयास्त्वां न जहति ॥ ६॥

नमामि त्वां गङ्गे श्रुतिवनविहारैकनिपुणे
जगन्मातर्मातस्त्रिपुरहरसेव्ये विधिनुते ।
त्वमेवाद्या दुर्गा जनहितकृते त्वं द्रवमयी
स्वयं जाता देवि त्वमसि परमं ब्रह्म विदितम् ॥ ७॥

कदा गङ्गे रम्ये तटमधिवसस्ते शिवनुते
शिवे दुर्गे मातः सकलफलदे देवदयिते ।
परेशे सर्वेशे श्रुतिशतनुते दक्षतनये
सदाऽहं सञ्जल्पन्निमिषमिव नेष्यामि दिवसान् ॥ ८॥

गङ्गाष्टकमिदं पुण्यं प्रभाते यः पठेच्छुचिः ।
सर्वाभीष्टं ततस्तस्मै ददाति सुरनिम्नगा ॥ ९॥

इति स्वामि-श्रीमदनन्तानन्दसरस्वतीविरचितं गङ्गाष्टकं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Gangashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*